Shri Radhakrishna Suprabhatam

# श्रीराधाकृष्णसुप्रभातम्

## Document Information

Text title : rAdhAkRRiShNasuprabhAtam

File name : rAdhAkRRiShNasuprabhAtam.itx

Category : suprabhAta, devii, rAdhA, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran

Description/comments : Datta Gopala Krishna, Pammal, Chennai 9442252443

Source : kalyANamanjarI dvitIya bhAgaH rAdhAkalyaNam

Acknowledge-Permission: Svarna Prakashanam

Latest update : May 14, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2022

*sanskritdocuments.org*

# श्रीराधाकृष्णसुप्रभातम्

सत्यं धर्ममपीह रक्षितुमहो भूभारनाशाय वै
दैत्यैस्तापितसर्वदैवतगणान् संरक्षितुं लीलया ।
लीलामानुषविग्रहः समभवद्यो वा हरिर्भूतले
राधाकृष्णमहाप्रभुः स भगवान् रक्षां करोत्वन्वहम् ॥ १॥

गोपीरूपधरान् महामुनिगणान् गोरूपदेवान् सदा
रक्षायै समनुग्रहाय च मुदा कृष्णं वपुः प्राप यः
सोऽयं सार्वजनीनवन्द्यविभवो विश्वैकरक्षाकरः
राधाकृष्णमहाप्रभो सुरपते ते सुप्रभातं शुभम् ॥ २॥

सौन्दर्यं किल मूर्तमेव सकलं लोकैकविस्मापकं
चौर्यं यस्य च भक्तसङ्घविनुतं पापापहं प्रत्यहम् ।
मुष्णान्त्यद्य हि कृष्णचौर्यसुकथाः भक्तस्य दुःखानि वै
राधावल्लभ रासकेलिरसिक श्रीसुप्रभातं शुभम् ॥ ३॥

वेदान्तप्रतिपाद्यमानविभवो वेदैकवेद्यप्रभुः
वंशीवादनलोलुपः व्रजजनानन्दैकधुर्यो विभुः ।
विख्यातो भुवनेषु बालवपुषा वीणामुनीन्द्रस्तुतः
राधालोल रमापते यदुपते ते सुप्रभातं शुभम् ॥ ४॥

राधावल्लभ रञ्जिताखिलमनाः कन्दर्पदर्पापह
लीलालोलुप लब्धभक्तिसुलभ श्रीदेवकीनन्दन ।
लीलामानुष लोलकुन्तल महालावण्यरत्नाकर
राधामाधव रम्यकेलिकुतुकिन् ते सुप्रभातं शुभम् ॥ ५॥

पूज्याष्टाक्षरमन्त्रमन्त्रित नमो नारायणाख्य प्रभो
श्रीमद्द्वादशमन्त्रनित्यमहित श्रीवासुदेव प्रभो ।
रांपूर्वैश्च षडक्षरैः सुविदित श्रीवीरराम प्रभो
राधाकृष्ण महाप्रभोऽखिलगुरो ते सुप्रभातं शुभम् ॥ ६॥

त्वं सान्दीपनिसद्गुरोर्हि वचसा सामुद्रमग्नं शिशुं
आनीयापि च सद्गुरोर्हि निकटे प्रत्यर्पयः सत्वरम् ।
तेन त्वां गुरुराट् प्रपूजयदहो पुत्रस्य लाभात् स्वकात्
भो देव त्वमचिन्त्यविक्रमगुणस्ते सुप्रभातं शुभम् ॥ ७॥

भुक्त्वा तत्पृथुकं कुचेलगृहिणीसम्प्रेषितं सादरं
विद्याभ्याससहायकस्य च गृहं श्रीश्रीसमृद्धं व्यधाः ।
आर्तत्राणपरायणः स भगवान् सर्वस्वदानोद्यतः
राधाकृष्ण सुसुन्दरार्तिहरण श्रीसुप्रभातं शुभम् ॥ ८॥

आदित्यादिनवग्रहाश्च तिथयः होरा च योगास्तथा
नक्षत्राणि च वास्तवः प्रतिदिनं दिक्पालभूतानि वा ॥

राधाकृष्णनिविष्टचेतसममी नो पीडयन्ति ध्रुवं
राधाकृष्णमहाप्रभो तव शुभं सुप्रातमेवाद्य हि ॥ ९॥

देव त्वां शरणं गतोऽस्मि सततं राधामनोल्लासक
त्वं मातासि पिता तथैव सहजो बन्धुश्च पुत्री सुतः ।
सर्वस्वं हि मम त्वमेव सततं श्रीगोपिकाप्रेमभाक्
पाह्यस्मान् सकुटुम्बकान् तव पदद्वन्द्वैकसेवारतान् ॥ १०॥

राधाकृष्णमहाप्रभो त्रिभुवनक्षेमङ्करस्याशु वै
श्रीसुप्रातमिमं समाधितमना यो वा पठेदन्वहम् ।
सो नित्यं विजयी समाप्तसुधनः सत्पुत्रपौत्रैर्वृतः
दीर्घायुश्च निरामयश्च निवसेत् श्रीकृष्णकारुण्यतः ॥ ११॥

इति श्रीराधाकृष्णसुप्रभातम् ॥

From kalyANamanjarI, dvitIya bhAgaH rAdhAkalyaNam
sangrahItaM rA. dattagopAlakRRiShNaH, svarNaprakAshanam

Proofread by PSA Easwaran

pdf was typeset on October 30, 2022

Please send corrections to *sanskrit@cheerful.com*